International Journal of Sanskrit Research 2020; 6(2): 170-174

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(2): 170-174
© 2020 IJSR
www.anantaajournal.com
Received: 24-01-2020
Accepted: 27-02-2020

डॉ. दीपाली जैन
कन्यागुरूकुलमहाविद्यालयः,
गुरूकुलकाँगड़ीविश्वविद्यालयः,
हरिद्वाराम्, उत्तराखण्ड, भारत।

डॉ. वीना विश्नोई शर्मा
कन्यागुरूकुलमहाविद्यालयः,
गुरूकुलकाँगड़ीविश्वविद्यालयः,
हरिद्वाराम्, उत्तराखण्ड, भारत।

Corresponding Author:
डॉ. दीपाली जैन
कन्यागुरूकुलमहाविद्यालयः,
गुरूकुलकाँगड़ीविश्वविद्यालयः,
हरिद्वाराम्, उत्तराखण्ड, भारत।

# वैदिकग्रन्थेषु संस्कृतवाङ्मये च जलशोधनोपायाः

**डॉ. दीपाली जैन, डॉ. वीना विश्नोई शर्मा**

**सारः -**

वर्तमानकाले महत्कष्टकरमिदं तथ्यं, यत् सार्वजनिकजलस्थानेषु अमेध्यपदार्थानां विसर्जने न संकोचमनुभवन्ति जनाः। गंगासदृशा पवित्रनदी अपि प्रदूषिता वर्तते। येन तस्याः जलं केषुचित्स्थानेषु अस्वास्थ्यकरं जातम्। उक्त-नीतिवचनानि चेदवाहिताः पालयेयुः जनाः, तर्हि जलसंरक्षणं प्राकृतिकस्तरे एव भवितुमर्हति। अतः नदीनदसरित्पतिसमुद्रतीरे तज्जले वा शरीरस्य मलत्यागः कदापि न करणीयः-

**नदीनां च प्रतीरे च पत्युश्च सरितां तथा।**
**शरीरस्य मलत्यागं न कुर्याज्जीवने तथा।।**[1]

नैत्यिक-नैमित्तिककर्माणां रहस्यावबोधेन च अग्निहोत्रदीनां प्रातःकरणीयं संध्यायोपासनपुरःसरं सूर्याय अघ्यदानं पितृभ्यः जलांजलिना तर्पणमित्यादेः माहात्म्यवधोयम्। एतैः कर्मभिः निरन्तरं मेघजीवनं भवति, उषःकालीनसूर्यस्य अरुणरश्मिभिश्च अघ्यादिकविषयकजलदानेन तरंगरूपेण संवर्धितं वाष्पं गृह्यते। नदीजलमुक्तगुणदोषविभागैः भिद्यते एवम्। पुराणसाहित्ये नादेयजलस्य गतिरसस्पर्शगतभेदाः प्रोक्ता । काश्चिन्नाद्यः मधुरजलाः काश्चित्कषायरसा काश्चिदुष्णजला काश्चिदुष्णजला, काश्चित्सदाकालवहाः काश्चिद्वेगवहाः काश्चिच्च मन्दवहाः भवन्ति, काश्चित्सदाकालवहाः काश्चिच्च वर्षाकालवहाः भवन्ति ।

कौपनादेयव्यतिरिक्तं सारसं जलं मधुरं लघु, वाप्यं जलं वातश्लेष्महरं, ताडागं वातलं नैर्झरं रौच्यमग्निकरं कफघ्नं लघु च भवति, औद्भिदं जलं पित्तनाशनं, दिने सूर्यकिरणैः रात्रौ च चन्द्रकिरणैर्जुष्टं सर्वदोषविनिर्मुक्तं शुद्धम् आन्तरिक्षजलेन सदृशमेव भवति –

**........................ सारसं मधुरं लघु ।**
**वातश्लेष्महरं वाप्यं ताडागं वातलं स्मृतम् ।।**

उक्तप्रसंगे उल्लेखनीयम् यदेकतः सर्वाणि जलानि शुद्धानि पवित्राणि चोक्तानि अपरतः वापीकूपादीनां प्रथमं जलपमेयं मतम् । अस्य तात्पर्यमिदं यत्स्वभावतः जलं शुचि भवति, किन्तु वापीकूपादीनां निर्माणानन्तरं यदा तेषां प्रतिष्ठा क्रियते तदा प्रथमं जलं

यत्सरिदादीनां प्रवाहात्, प्रणालिकामाध्यमेन अन्यैः साधनैर्वा आह्नियते, मार्गविकारद् उद्वहनाद्वा तस्मिन् जले अपतत्त्वानां समावेशः सम्भाव्यते ।

**उद्योगनिर्गतमलमूत्रादीनां मृतशरीराणां दाहसंस्कारेण कलुषितजलम् -**

जलप्रदूषणं सामान्यसमस्या अस्ति, विशषतः वर्तमानसमये मानवीयौद्योगिकप्राकृतिकापविष्टपदार्थानाम् अपवाहेन जलप्रदूषणमत्याघिकं वृद्धिं प्राप्तम्। समुद्रीयतैलभाण्डाराणां अन्तः प्रवाहः अपतटतैलवेघनसंक्रियाः (Offshore oil drilling operations) इत्यादिना सागरीयजलमपि विषालु भवतीदानीम्। अतः प्रदूषणं नियम्य जलस्योपयोगितायां गुणात्मकवृद्धिः कर्तुं शक्यते ।

यत्र नदीजलाशयप्रस्त्रवणादिभिः जलोपलब्धिः सम्भाव्यते तत्र भूमिगतजलमापात्कालाय स्थापयितव्यम्। निर्जलप्रदेशेषु च जलस्य समस्तापूर्तिः भूमिगते जले एवाश्रिता भवति। भूमिगतजलमपि सर्वत्र सर्वदा समानं न तिष्ठति। अतः भूमिगतजलस्योपयोगः विवेकपूर्वकमेव करणीयः ।

**कुंजी शब्दाः-**

कलुषं, कटुकं, पंचगव्यम्, कषायं, भूमिष्ठजलं, आसवन, तोयशुद्धि, शरीरसंघट्टेन।

**आमुखः-**

वर्तमानकाले जलप्रदूषणम् तस्य शोधनम् च मानवाय चुनौतिः रूपे अप्रकटत्। प्रस्तुत शोधस्योद्दश्याधारश्च मुख्यतः मनावानाम् जागृतैव प्रासंगिकता च रेखाङ्कनमास्ति। अत्र क्लिष्ट कार्यं सिद्धि हेतुम वैदिकग्रन्थेषु जलशोधनस्य महत्स्थानम् च जीवनाय अनिवार्यंगम् तस्य आधारे उद्देश्यम् प्राप्तिं प्रयासाश्च्।

वर्तमानसमये मृदुजलस्य अभावो जायते रासायनिकोपक्षेपकैः क्षारं जलमधिकमात्रायामस्ति । भूमिगतजलस्य अतिसंदोहनात् अन्यैश्च भौगोलिकसांस्कृतिककारणैः भूमिगतजलस्य स्तरम् निम्नतरं भवति परिमाणं च न्यूनं भवति। अतः जलापूर्तेः स्थायिचक्रस्योद्देश्येन पृथिव्याम् उपलब्धमृदुजलस्य संरक्षणार्थं सम्भाव्यजलभण्डारस्य च संवर्धनार्थं संचयार्थंच इष्टापूर्तस्य नियमविधानं तदर्थं च राजकीयस्तरे प्रजाभिश्च व्यापकस्तरे योजनाः क्रियान्वयनीयाः। एतत्कृते धर्मशास्त्रीयविधानं प्रति प्रजाजनानां वैज्ञानिकदृष्टिः प्रवर्ततामिति प्रयासः सुधीजनैः अवश्यंकरणीयः।

**शोधस्य विधिः-**

शोधविधि शोधे प्रमुख सोपानः अस्ति। अत्र प्रस्तुत शोधपत्रे प्राथमिक द्वितीयक च स्त्रोतयो समायोजितं कर्तुं शक्यन्ते। यथा जलशोधनस्य पारम्परिक विधियः प्रासंगिकता निष्कर्षे प्राप्तुम प्रयासास्ति। विभिन्न ग्रन्थेषु जलशोधनस्य महत्वम् स्थापितुम् प्रकृतेः सम्बन्धमाश्च प्रयासश्चास्ति। वर्तमानकाले जलाय् मानवीयसंवेदनानाम् वांछितस्तरे जागृताय निष्कर्षे प्राप्तुम प्रयासास्ति।

**विवेचनाः-**

अत्र प्रस्तुत शोधपत्रः मुख्यतः वैदिकसाहित्ये जलशोधनस्य विधियः उल्लिखिता। वैदिकग्रन्थेषु जलशोधनस्य सन्दर्भे अध्ययनं इति परिलक्षितः शुद्ध जलं मानवजीवनस्य अभिन्न अंगमास्ति अपितु 'मृदुजलम्जीवनमास्ति' जीवनस्य प्रर्यायास्ति। 'जलविन्दुनिपातेन क्रमशः पूर्यते घटः' इति न्यायेन सर्वाभिः प्रजाभिः अल्पमपि प्रदत्तेन जलेन उपभुक्तजलस्य प्रतिपूर्तिः भवति। एवमेव खातेष्वखातेषु च जलधारेषु वार्षिकं भौमं वा जलं संचित्य तेषां स्वच्छतापादनाय च धर्मशास्त्रोक्तान् नियमान् अवधार्य सर्वविधप्रदूषणात् जलं संरक्षयितुं शक्यते। तीर्थस्थानानां पावनत्वेऽपि सावधानाः व्यवस्थापकाः धार्मिकाः प्रजाश्च प्रयत्नशीलाः भवेयुः। अस्मिन् सन्दर्भे ब्रह्मपुराणोक्तं विश्वामित्रतीर्थस्य आख्यानम् उदाहरणस्वरूपमस्ति। तदनुसारम् अनावृष्टिकाले सशिष्यः गौतमीतटं प्राप्तः विश्वामित्रस्य यदा बुभुक्षाकुलः शिष्याहृतं श्वामांसं भक्षितुं समुद्यतः तर्हि इन्द्रः श्येनरूपं धृत्वा मांसपात्रमाहृतवान्। ततः विश्वामित्रस्य कोपात् भयभीतः इन्द्रः सहस्राक्षमेघैः वर्षां कारितवान्। ततस्तत्स्थानं विश्वामित्रतीर्थत्वेन प्रसिद्धम्।

नैत्यिक-नैमित्तिककर्माणां रहस्यावबोधेन च अग्निहोत्रादीनां प्रातःकरणीयं संध्यायोपासनपुरःसरं सूर्याय अघ्र्यदानं पितृभ्यः जलांजलिना तर्पमित्यादेः माहात्म्यवधोयम्। एतैः कर्मभिः निरन्तरं मेघजीवनं भवति, उषाकालीनसूर्यस्य अरुणरश्मिभिश्च अघ्र्यादिकविषयकजलदानेन तरंगरूपेण संवर्धितं वाष्पं गृह्यते।

**जलशोधनोपायाः-**

भूमिष्ठजलेन कूपवापीतड़ागजलाशय-प्रणाली-आदिजल-धाराः ज्ञेयाः। एतत्प्रकारस्य जलशोधनस्य सन्दर्भे संस्कृतसाहित्ये उक्तः तड़ागादिप्रतिष्ठाविधिः महत्त्वपूर्णः पूर्तकर्मणि तड़ागादिखातानां निर्माणानन्तरं प्रतिष्ठापूर्वकं लोकार्पणमेव कल्याणकरं भवति। प्रथमं खातं विशोध्य मण्डपीकृत्य यज्ञकर्मणा पावनीकृत्य शुद्धपवित्रतीर्थोदकस्य आधानं कुर्यात्। तड़ागादिषु कर्मसु यः शान्तिं न कारयति तस्य तत्पूर्तकर्म ऊषरे उप्तं वीजमिव निष्फलं भवति-

**यो न कारयते शान्तिं तड़ागादिषु कर्मसु।**
**तस्य न्निष्फलं सर्वमुप्तं बीजमिवोषरे।।**[2]

भूमिष्ठजलस्य सम्भाव्यप्रदूषणैः रक्षायै शैवालादयो वनस्पतयो महदुपयोगिनो भवन्ति। अथर्ववेदे शैवालस्य गन्धर्वेभ्यो रक्षणार्थम् इन्द्रस्य स्तुतिः कृता-

**भीमा इन्द्रस्य हेतयः शतमृष्टीरयस्मयीः।**
**ताभिर्हविरदान् गन्धर्वानावकादान् कृषतु।।**[3]

जलीयजन्तूनां पालनेनापि जलशोधनं भवति। मत्स्यादयः जलस्थान् कृमीन् अवांक्षनीयशैवालादीनां जरायुं च भुक्त्वा जले निरन्तरं संचरणेन च जलशोधनं कुर्वन्ति। जलस्य मन्थनेन हि नैर्मलयमागच्छति।
जले पंकादिमलानां शोधनार्थं कतकनिक्षेपणस्य विधानमुक्तम्। मनुस्मृतौ यथा-

**फलं कतकवृक्षस्य यद्यप्यम्बुप्रसादनम्।**[4]

सर्वदर्सनसंग्रहे दृष्टान्ततया कतकेन जलशुद्धिप्रक्रिया उक्ता-

**यथा पंके कलुषतां कुर्वति कतकाद्रिद्रव्यसंबन्धादधः पतिते जलस्य स्वच्छता।**[5]

कतकादिद्रव्यसंसर्गेण जले विलेयाः पार्थिवकणाः नितलदेशे स्थिरीभवन्ति। उपरितनीयो भागः स्वच्छो भवति। अयं विधिः जलशोधनस्य अस्थायिविधिरस्ति। अस्मिन् कालेऽपि मलकर्षणार्थं कतकस्य इति फलविशेषस्य बहुविधोपयोगः क्रियते। वृहत्संहितायां कूपजलशुद्धये अंजलमुस्ता-उषीरराजकोशातकामलककतकफलानां योगः सर्वथा उपयोगिमतम्। अनेन योगेन कलुषं कटुं लवणं विरसं अशुभगन्धयुक्तं चापि जलम् अमलं सरसं सुगन्धितम् अपरैश्च गुणैर्युक्तं भवति-

**अंजनमुस्तोशीरैः सराजकोशातकामलकचूर्णैः।**
**कतकफलसमायुक्तैर्योगः कूपे प्रदातव्यः।।**

कलुषं कटुकं विरसं सलिलं सुसुगन्धिगुणैः वाशुभगन्धि भवेत्।

**तदनेन भवत्यमलं सुरसं सुसुगन्धिगुणैः परैश्च युतम्।।**[6]

तड़ागादिप्रतिष्ठकाले तस्मिन् प्रक्षिप्तं जलं प्रथमतोऽपेशं भवति। तस्य पंचगव्शेन शुद्धविधानमस्ति। शास्त्रेषं पंचगव्यं महापातकनाशकमित्युक्तम्।

बृहस्पतिस्मृतौ पंचगव्यनिर्माणविधि उक्तः। तच्च-शुक्लगोः मूत्रं, कृष्णगोः गोमयम्, रक्तगोः दुग्धं, श्वेतगोः दधि, कपिलायाश्च घृतमिति तीर्थानां नदीनांच जले पृथक्-पृथक् कुशया प्रणवोच्चारणपुरःसरं मथित्वा निर्मेयम्।[7] एवं पंचगव्येन शुद्धेन तीर्थजलेन नदीजलेन वा तड़ागादि पूरणीयम्।
वर्षाकालेषु पुनः क्रमेण पूर्यमाणं जलाशयादिकस्य जलं सर्वैः पेयं भवति। अथ कदाचित् तड़ागादिजले अमेध्यद्रव्यसंपातेन दूषिते सति शतं घटं जलं तस्मादुद्धृत्य पंचगव्यसमर्पणेन च तत् शुद्धिं याति।

**वापीकूपतड़ागेषु दूषितेषु कथंचन।**
**उद्धृत्य वै घटशतम् पंचगव्येन शोधयेत्।।**[8]

गरुड़पुराणे उद्धृतस्य जलस्य शोधनार्थं पंचगव्यप्रयोगो विहितः। अस्थिचर्ममलमूषिकादीनाम् अमेध्यद्रव्याणां जलनिपाते सति कूपादिभ्यः जलमुद्धृत्य पंचगव्येन शोधयेत्-

**अस्थिचर्ममलं वापि मूषिकं यदि कूपतः।**
**उद्धृत्य चोदकं पंचगव्याच्छ्ध्येत् शोधितम्।।**[9]

तड़ागे पुष्करिण्यादौ जलशुद्धये भस्म पातयेत्। ततः षट्कुम्भानपः उद्धृत्य पंचगव्येन शुद्धिं याति।

**तड़ागे पुष्करिण्यादौ भस्मादि पातयेत्तथा।**
**षट्कुम्भानप उद्धृत्य पंचगव्येन शुध्यति।।**[10]

उक्तविधौ औपशमिक्यौ उच्येते, यताहि एताभ्यां जले विलेयानि पृथक्करणीयानि मलानि पार्थिवकणाः वा जलतले शाम्यन्ते। तड़ागादीनां जलाधारणां जलं कृम्यादिभिः दूषयितुं शक्यते। अतः यथाकालं प्रणाल्यादिभ्यः तस्य परीवाहः जलशुद्धये करणीयः। पंचतन्त्रे उत्तररामचरिते च अलंकारमुखेन तथ्यमिदं प्रतिपादितम्-

**तड़ागोदरसंस्थानां परीवाह इवाम्भसाम्।**[11]
**तड़ागोदरसंस्थानां परीवाहः प्रतिक्रिया।।**[12]

यजुर्वेदे सूर्यरश्मिभिः जलशुद्धेः उल्लेखः प्राप्यते-
पवित्रे स्थो वैष्णव्यो सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण।

**सूर्यस्य रश्मिभिः देवीरापाऽग्रे गुवोऽग्रे पुवोऽग्रे**
**इममद्य यज्ञं नयताग्रे यज्ञपतिं सुधातुं यज्ञपतिं देवयुतम्।।**[13]

हे जलानि ! सर्वप्रेरक - सवितुः प्रेरणया छिद्ररहितपावकवायुभूतेः सूर्यरश्मिभिः मन्त्रैरभिमन्त्र्य युष्मान् शोधयामि। परमात्मतेजसा तेजोमयाः यूयं प्रथम-शोधकाः स्थ। सूर्यतापेन जलशुद्धिः अति सूक्ष्मगन्धादियुक्मलापसारणायोपयोगिनी भवेत्। सर्वद्रव्याणि जलेन शोध्यानि। अतः जलमेव प्रथमं शोध्यते-

**युष्माऽइन्द्रोऽव्रणीत वृत्रतूर्ये यूयमिन्द्र वृणीध्वं वृत्रतूर्ये प्रोक्षितास्थ त्वां जुष्टं प्रोक्षामि।**[14]

सूर्यरश्मयः सर्वप्रकारकस्य जलस्य शुद्धिं कुर्वन्ति। किन्तु शुद्धस्य जलस्योपयोगः पानाद्यर्थं विना शीतीकरणं नोपयुज्यते। एतस्मादेव भविष्यपुराणे उक्तं यत्-

**सूर्यरश्मियुतं यद्वै तत्तोयं तु विनिन्दितम्।**
**चन्द्ररश्मिविहीनं यन्नमृतत्वाय कल्यते।।**[15]

कर्दमः तोयश्च प्राकृतिकरूपेण सूर्येण वायुना च शुद्धे भवतः। न अकारणं तदुपायैः शोधयितुमावश्यकता भवति यथाक्तं पराशरस्मृतौ-

**रथ्याकर्दमतोयानि नावः पन्थास्तृणानि च।**
**मरुतार्केण शुध्यन्ति पक्वेष्टकचितानि च।।**[16]

गौतममुनेः गृहं कदाचित्सर्वाः देवता आगच्छन्। भोजनानन्तरं ताभ्यः शुद्धं जलं पातुं दत्तवान् स मुनिः-

**अथौ जलसंस्कारं कृतवान् गौतमो मुनिः।**[17]

तदुक्तः जलशुद्धिविधिः एवं वर्णितः-

**आरक्तसुस्निग्धसुसूक्ष्मगात्राननेकधा-धौतसुशोषितांगान्।**
**तड़ागतोयैः कृतवीजघर्षितैर्विशोधितैस्तैः करकानपूरयत्।।**
**नद्याः सैकतवेदिकां नवतरां संछाद्य सूक्ष्माम्बरैः।**
**शुद्धैः श्वेततरैस्तथोपरि घटांस्तोयंन पूर्णां क्षिपेत्।।**
**क्षिप्तानालकजातिमास्तपुटकं कंकोलकस्तूरिकां-**
**चूर्णं चन्दनचन्द्ररश्मिविशदां मालां पुटान्तां क्षिपेत्।।**
**यामस्थापि पुनश्च वारिवसनेनाशोध्य कुम्भे क्षिपेत्।**
**चन्द्रग्रन्थिमथो निधाय वकुलं क्षिस्वा तथा पाटलम्।।**
**शेफालीस्तबकमथो जलं च तत्र विन्यस्य प्रथमत**
**एव तोयशुद्धिम्।**
**कृत्वाथो मृदुतरसूक्ष्मवस्त्रखण्डेनावेष्टितसृणिकमुखं**
**च सूक्ष्मचन्द्रम्।।**[18]

उक्तविधिना जलशुद्धिः अनेकेषु चरणेषु सम्पाद्यते-

1. रक्तस्निग्धसूक्ष्मावयवयुक्तान् घटान् अनेकधा प्रक्षाल्य सम्यक्शोषयित्वा स्थापयेत्।
2. वीजैः घर्षणैः विशोधितेन तडागजलेन घटान् पूरयेत्।
3. तोयेन् पूर्णान् घटानुपरि शुद्धैः श्वेततरैः सूक्ष्मवस्त्रैः जलपूर्णान् घटान् संक्षाद्य नवतरां नादेयीं सिकतां क्षिपेत्।
4. जातिकंकोलकस्तूरिकाचन्दनचन्द्ररश्मिसंयुतां पुटानां मालां यामस्थां पुनः वारिवसेनाशोध्य घटे क्षिपेत्।
5. प्रथमत एव तोयशुद्धिं कृत्वा शेफालीस्तबकं जलं च तत्र विन्यस्य मृदुतरसूक्ष्मवस्त्रेणावेष्टितमुखं सूक्ष्मचन्द्रं (लब्ध्वाकारमुखं घटं) स्थापयेत्।
   एवं शुद्धजलपूर्णं घटम् अनातपप्रदेशे निधाय मन्दवातसमीपं सूक्ष्मव्यजनैर्वीजितव्यम्। एवं तक्ष्छुद्धं जलं शीतं भवेत्। परिवेशनकालेऽपि प्रदाता सूक्ष्मवस्त्राल्पवेष्टनं घटं वामकरे

**निधाय दोरिकान्यस्तं घटमुन्मुच्य जलं प्रदायेत्।**[19]
**चाणक्यनीतावपि 'वस्त्रपूतं जलं पिवेत्' इत्युपदिष्टम्।**[20]

सोमलतया जलशुद्धिः वेदेषु बहुशः उक्ता। सोमेन जलवर्धकश्च मतः। अन्तरिक्षजलस्य शुद्धेः कारणं सोमः मन्यते, यतो हि यज्ञेन अन्तरिक्षं प्राप्य सोमः वर्षाजले गुणाधानं करोति। तज्जलं वर्षया नद्यादिषु प्राप्तं मंगलकरं भवति।

महासागरेषु अगाधं जलं वर्तते, यस्य गर्भे असंख्याः जलचराः जलीयजन्तवः वनस्पतयः रत्नानि चाश्रयन्ते। यद्यपि सागरीजलस्य अधिंकाशः पेयत्वेन न प्रयुज्यते, तथापि भूलोकस्य जैविकपर्यावरणस्य महत्त्वपूर्णतत्त्वमस्ति। विश्वस्य सर्वासामपि नदीनां सम्पूर्णः मलापवाहः तासां जलेन सह सागरे निमज्जति। वर्तमानसमये तु व्यापारिकसैन्यप्रयोजनाभ्यां सागरवक्षसि तैलसंचालितानि जलयानानि तिष्ठन्ति, येभ्यः तैलीयापशिष्टं सागरे पतित्वा विषाक्तरेडियोधर्मि प्रदूषणं जायते। समुद्रतटेषु परमाणुपरीक्षणैः अप तित्रत्यं जलं प्रदूषितं जायते। समुद्रीयप्रदूषणस्य सर्वाधिकं दुष्प्रभावः जलजन्तूनां रत्नानामुपरि च भवति, येन न केवलं महासागरीयजलचक्रम् अव्यवस्थितं भवति। किन्तु सागरीयजलस्य शोधनं न सर्वदा सर्वथा कर्तुं शक्यते। जलशुद्धेः सन्दर्भे सागरमन्थनस्य घटना प्रासंगिकी प्रतीयते। उल्लेखनीयमस्ति यद् देवासुरसंग्रामे

अमुतप्राप्तये देवानाम् आह्नाने असुरसहाय्येन समुद्रमन्थनं कृतं यस्मात् सर्वप्रथमं विषम् अन्ते चामृतं प्राप्तम्।
संस्कृतसाहित्ये जलशोघनस्य उल्लिखिताः विघयः निम्नवत् सूचीबद्धा कर्तुं शक्यन्ते-

1) औपशमिको विघिः।
2) पंचगव्यविघिः।
3) परीवाह - विघिः।
4) तापोपस्करण - विघिः।
5) वस्त्रगालनविघिः।
6) सिकताप्रस्तरणकरणैः गालनम्।
7) आसवनविघिः।

वर्तमानसमये प्रायः निम्लिखितविघयो जलशुद्धये प्रयुज्यन्ते-
यान्त्रिकशोघनविघौ विशेषयान्त्रिकोपकरणैः जले विलेयापशिष्टानां गालनं क्रियते, येन शुद्धं जलं पात्रे स्त्रवति मलंच बहिः तिष्ठति।
भौतिकरासायनिकशोघनविघिना जले मिश्रितानां कार्बनिकाकार्बनिकपदार्थानां पृथक्करणाय रासयनिका-भिकारकाः प्रयुज्यन्ते।
जले गुणवत्तावर्धनस्य उपायोऽयं, यतोहि ताम्रेण संयुक्ते जले या विद्युत्पद्यते सा सूर्यस्य अरुधरश्मिभिः स्पृष्टा जलं शोधयति तस्य पोषकतां च वर्धयति। सूर्यस्य रश्मिभिः जलं शुभं शुद्धं निर्मलं पावनं शीतलंच भवति-

**इमा आपश्शिवास्सन्तु शुभाः शुद्धाश्च निर्मलाः।**
**पावनाः शीतलाः सन्तु पूता सूर्यस्य रश्मिभिः।।**[21]

**निष्कर्षः –**

मानवानाम् विशेषता जिज्ञासा मानवप्रकृति चास्ति। जिज्ञासा अस्य पुष्टि हेतुम् मानवः कस्य कारकं अव्यवा तत्वं मूलरूपकत्वं प्राप्तुम् प्रयासः करोति। 'अस्यअपवादं अहमनास्ति' अनुसोण वैदिक ग्रन्थेषु संस्कृत वाङ्मये च भूमिस्ठ जलस्य सम्भाव्य प्रदूषणैः रक्षायै, जलशोधनस्य महत्पूर्णा जलाशयादि प्रतिष्ठा पूतकर्मणि च तड़ागादिखातानाम पतिष्ठापूर्वकं लोकार्पणमेव कल्याणकरं भवति।
संस्कृतसाहित्ये सर्वत्र जलसंरक्षणस्य संचयस्य उपयोगस्य चर्चा कृता जलक्षेपणं क्वचिन्न विहितम्। जलस्य सर्वाधिकमपव्यः अमेध्यवस्तूनां तत्र निक्षेपेण भवति। सन्दर्भेऽस्मिन् धर्मशास्त्रीयजलोपयोगनियमाः महत्वपूर्णाः सन्ति। जले मूत्रपुरीषष्ठीवनं सृक्लोहितं वीर्यं विषमिति सर्वं नोत्सृजेत्। गृहोपयोगेषु द्रोणीषु अन्येषु पात्रेषु च यथाविधिना शुद्धं जलं यथायोग्यम् एवोपभोग्यम्। उपकूपमाहावाः वृक्षमूलेषु आवापाश्च तदुद्देश्येन प्रयुक्तस्य जलस्यापव्ययवारणोपायत्वेन मन्तव्याः। सवीनाहाः कूपाः जलनिःसारणे जलोत्प्लावं वारयन्ति। अन्यच्च संस्कृतसाहित्ये जलमुपास्यं देवस्वरूपं मतमतः तद्भावेनैव आवश्यकतानुसारमेव जलस्य उपयोगेन भौममृदुजलभण्डारं स्थायीकर्तुं शक्यते। वर्तमानसमये जलाय मानवीयसंवेदनानाम् वांछितस्तरे जागृताय निष्कर्षे प्राप्तुम प्रयासास्ति।

**आभारोक्तिः-**
प्रस्तुत शोधे ईश्वरकृत वेदानाम् प्राचीन ग्रन्थानाम् च ज्ञानं विभिन्नमाध्यमे प्रसारणम् अकुर्वन्। तेभ्यः वयं आजीवनं आभारी वर्तिष्यामहे।

।।इति।।

**संदर्भ ग्रन्थ : -**

1. पद्मपुराणे सृष्टिखण्डे 51/95-96
2. भविष्यपुराणे उत्तरपर्वणि- 127/60
3. अथर्ववेदे 4/8/37/8-9
4. मनुस्मृतौ-6/67
5. सर्वदर्शनसंग्रहे पृष्ठे 147
6. वृहत्संहिता-दकार्गलाध्यायः- 53/121-122
7. बृहस्पतिस्मृतिः 71/73
8. पराशरस्मृतिः 7/5
9. गरुड़पुराणे- 215/45
10. तदैव 215/46
11. पंचतन्त्रे मित्रसंप्राप्तिः 152
12. उत्तररामचरिते-2/9
13. यजुर्वेदे- 1/12
14. यजुर्वेदे 1/13
15. भविष्यपुराणे- 9/71
16. पराशरस्मृतौ-7/37
17. पद्पमपुराणे पातालखण्डे 114/208
18. पद्मपुराणे पातालखण्डे 114/209-212
19. तदैव 114/213, 114/219-220
20. चाणक्यनीतौ- 10/2
21. तन्त्रसमुच्चये- पृष्ठे-216